# शिवापराधक्शमापण स्तोत्रम्

आदौ कर्मप्रसङ्गात्कलयति कलुषं मातृकुक्शौ स्थितं मां
विण्मूत्रामेध्येमध्ये कथयति नितरां जाठरो जातवेदाः।
यद्यद्वै तत्र दुःखं व्यथयति नितरां शक्यते केन वक्तुं
क्शन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥ १॥

बाल्ये दुःखातिरेको मललुलितवपुः स्तन्यपाने पिपासा
नो शक्तश्चेन्द्रियेभ्यो भवगुणजनिताः जन्तवो मां तुदन्ति।
नानारोगादिदुःखाद्रुदनपरवशः शङ्करं न स्मरामि
क्शन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥ २॥

प्रौढोऽहं यौवनस्थो विषयविषधरैः पञ्चभिर्मर्मसन्धौ
दष्टो नष्टोऽविवेकः सुतधनयुवतिस्वादुसौख्ये निषण्णः।
शैवीचिन्ताविहीनं मम हृदयमहो मानगर्वाधिरूढं
क्शन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥ ३॥

वार्धक्ये चेन्द्रियाणां विगतगतिमतिश्चाधिदैवादितापैः
पापै रोगैर्वियोगैस्त्वनवसितवपुः प्रौढहीनं च दीनम्।
मिथ्यामोहाभिलाषैर्भ्रमति मम मनो धूर्जटेर्ध्यानशून्यं
क्शन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥ ४॥

नो शक्यं स्मार्तकर्म प्रतिपदगहनप्रत्यवायाकुलाख्यं
श्रौते वार्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गेऽसुसारे।
ज्ञातो धर्मो विचारैः श्रवणमननयोः किं निदिध्यासितव्यं
क्शन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥ ५॥

स्नात्वा प्रत्यूषकाले स्नपनविधिविधौ नाहृतं गाङ्गतोयं
पूजार्थं वा कदाचिद्बहुतरगहनात्खण्डबिल्वीदलानि।
नानीता पद्ममाला सरसि विकसिता गन्धधूपैः त्वदर्थं
क्शन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥ ६॥

दुग्धैर्मध्वाज्युतैर्दधिसितसहितैः स्नापितं नैव लिङ्गं
नो लिप्तं चन्दनाद्यैः कनकविरचितैः पूजितं न प्रसूनैः।
धूपैः कर्पूरदीपैर्विविधरसयुतैर्नैव भक्श्योपहारैः
क्शन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥ ७॥

ध्यात्वा चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो
हव्यं ते लक्शसह्लख्यैर्हुतवहवदने नार्पितं बीजमन्त्रैः।
नो तप्तं गाङ्गातीरे व्रतजननियमैः रुद्रजाप्यैर्न वेदैः
क्शन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो ॥ ८ ॥

स्थित्वा स्थाने सरोजे प्रणवमयमरुत्कुण्डले सूक्श्ममार्गे
शान्ते स्वान्ते प्रलीने प्रकटितविभवे ज्योतिरूपेऽपराख्ये।
लिङ्गज्ञे ब्रह्मवाक्ये सकलतनुगतं शङ्करं न स्मरामि
क्शन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो ॥ ९ ॥

नग्नऐ निःसङ्गशुद्धस्त्रिगुणविरहितो ध्वस्तमोहान्धकारो
नासाग्रे न्यस्तदृष्टिर्विदितभवगुणो नैव दृष्टः कदाचित्।
उन्मन्याऽवस्थया त्वां विगतकलिमलं शङ्करं न स्मरामि
क्शन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो ॥ १० ॥

चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शङ्करे
सर्पैर्भूषितकण्ठकर्ण विवरे नेत्रोत्थवैश्वानरे।
दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे
मोक्शार्थं कुरु चित्तवृत्तिमचलामन्यैस्तु किं कर्मभिः ॥ ११ ॥

किं वाऽनेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं
किं वा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किम्।
ज्ञात्वैतत्क्शणभङ्गुरं सपदि रे त्याज्यं मनो दूरतः
स्वात्मार्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभम्॥ १२ ॥

आयुर्नश्यति पश्यतां प्रतिदिनं याति क्शयं यौवनं
प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्शकः।
लक्श्मीस्तोयतरङ्गभङ्गचपला विद्युच्चलं जीवितं
तस्म महां शरणागतं शरणद त्वं रक्श रक्शाधुना ॥ १३ ॥

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वाऽपराधम्।
विहितमविहितं वा सर्वमेतत्क्श्मस्व
जय जय करुणाब्धे श्री महादेव शम्भो ॥ १४ ॥